# पाठ- २९(ब)
# पत्रिकायाः प्रारूपम्

**सारान्शः**
संस्कृतस्य पत्रकारिताक्षेत्रम् अतिविशालम् । दुर्लभाः एव संस्कृतभाषायां कार्यकर्तारः । अतः संस्कृतपत्रकारिताम् अधिकृत्य यदि अपेक्षितम् आधारभूतं ज्ञानं प्राप्यते तर्हि जीवने व्यवसायस्य अनेके स्वर्णावसराः उपलब्धाः भविष्यन्ति । पत्रिकायाः पत्रस्य वा आकर्षणं चित्रैरेव वर्धते । चित्राणि यदि समुचित– शीर्षकैः युक्तानि भवन्ति तर्हि तानि झटिति पाठकस्य मनः आकर्षन्ति ।

**सम्पादकमण्डलस्य निर्माणम्-**
एकः प्रमुखः सम्पादकः भवति । केचन विषयपरामर्शकाः भवन्ति । कश्चन प्रबंधकः धनव्यवस्थादिकं कार्यं करोति । अतः सर्वप्रथमं सम्पादकमण्डलस्य निर्माणं करणीयम्।

**पत्रिकायाः नामाङ्कनम्-**
पत्रिकायाः नाम्नः पुलिस आयुक्तस्य आलेखे पंजीकरणम् आवश्यकम् । यदि नाम्नः पंजीकरणं न भविष्यति तर्हि किं भविष्यति? तदा तु वैधानिकरूपेण दण्डनीयः च अपराधः भवति ।

**पत्रिकायाः अवधिनिर्धारणम्-**
दिनपत्रिका अस्ति वा मासिकी, द्वैमासिकी, त्रैमासिकी वा, तदर्थं पूर्वमेव निश्चयः करणीयः ।

**पत्रिकायाः आकारनिर्धारणम्-**
दैनिक समाचारपत्रस्य आकारः भिन्नः भवति, साप्ताहिक-पत्रिकायाः आकारः भिन्नः भवति, द्वैमासिक-त्रैमासिकपत्रिकायाः आकारेषु अपि वैभिन्यं वर्तते। परन्तु एकस्याः पत्रिकायाः आकारः प्रायः सुनिश्चितः एव भवति येन तस्याः अभिज्ञानं सारल्येन भवेत् ।

**पत्रिकायाः उद्देश्यनिर्धारणम्, पाठकवर्ग–निर्धारणञ्च -**
प्रत्येक पत्रिकायाः यत् उद्देश्यम् भवति, तदनुरूपमेव पाठ्यसामग्रीणां संकलनं भवति।

**अपेक्षितसामग्रीणां चयनम्-**
- वैविध्यम्
- यात्रावर्णनानि
- महापुरुषाणां जीवनपरिचयः
- संस्थानां परिचयः
- सम्बद्धप्रशासनिकनियमानां ज्ञानम्
- मनोरञ्जकः सामग्री
- स्वास्थ्यविषयकाः
- समये प्रकाशनं वितरणं च
- धनव्यवस्था
- पाठकानां पत्राणि तेषाम् उत्तराणि च

**आवश्यकोऽयं ज्ञानम्**

**विज्ञापनानाम् आवश्यकता महत्त्वं च-**
पत्र-पत्रिकाणां कृते धनस्य आवश्यकता भवति। विज्ञापनैः पत्रिकायाः कृते आर्थिकी सहायता प्राप्यते। अतः पत्र-पत्रिकाणां कृते विज्ञापनानां महत्त्वम् अत्यधिकं भवति ।

**व्यक्तीनां वस्तूनां परिचयः-**
व्यक्तेः वस्तुनः वा परिचयलेखनात् पूर्वं रूपरेखायाः निर्माणं करणीयम्। वर्णनं मनोरंजकं भवेत् अतः तस्य प्रारम्भः केनापि प्रसंगेण भवेत्।

**व्यङ्ग्यचित्राणां भूमिका-**
पत्रपत्रिकासु व्यंग्यचित्राणां योजनेन पत्रिकायाः मनोरंजकता मस्तिष्क- उद्बोधनक्षमता, विषये ध्यानस्य केन्द्रीकरणं च जायते ।

**सूक्तीनां संयोजनम्-**
महापुरुषैः प्रकटितानि सुभाषितानि अथवा काव्येषु महाकाव्येषु प्रयुक्ताः सूक्तयः लेखानां समापने अथवा यत्र-तत्र उपलब्धस्थानस्य ज्ञानवर्धकाय उपयोगाय सूक्तीनां प्रयोगः क्रियते ।

**आकर्षकशीर्षकाणि**-
आकर्षक शीर्षकाणि पाठकस्य मनः झटिति एव आकृष्य तं लेखं/वार्ता / कथां वा पठितुं बाध्यं कुर्वन्ति ।

**शीर्षकाणां वैशिष्ट्यम्**
**1.** शीर्षकं सरलं सुबोध्यं च भवेत् ।
**2.** शीर्षक प्रायः शिक्षाप्रदं भवेत्।
**3.** शीर्षक सम्बद्धलेखस्य केन्द्रीयभावेन सम्बद्धं भवेत्।
**4.** शीर्षकं प्रायः लेखात् एव उद्धृतप्रायं भवेत् ।
**5.** कानिचित् आकर्षकशीर्षकाणि

**योग्यतां वर्धयत**
- पत्रिकाप्रकाशनम् अतीव महत्त्वपूर्णं कार्यम् अस्ति। अनेन जनकल्याणं भवति, संस्कृतस्य सेवा, प्रचार प्रसारःच भवति।
- व्यवसायस्य कृते अनेके अवसराः लभ्यन्ते ।
- पत्रिकायाः कृते अपेक्षितबिन्दूनां ज्ञानम् आवश्यकम् यथा यन्त्रीकरणम्, सामग्रीसंकलनम्, पत्रिकायाः आकारः, विशेष-अंकानां प्रकाशनम् धनव्यवस्था, मुद्रणव्यवस्था, त्रुटिसंशोधनम्, लेखानां संपादनम् इत्यादयः।
- विज्ञापनैः आर्थिकव्यवस्थायां सहायता प्राप्यते ।

- व्यक्तीनां, वस्तूनां परिचयलेखनं मनोर जकं ज्ञानवर्धकं च भवेत्।
- व्यंग्यचित्राणाम् आवश्यकता भवति।
- विभिन्नविषयकसूक्तीनां संग्रहःकरणीयः येन यत्र तत्र यदि पंक्तिद्वयस्य स्थानं भवति तत्र सूक्तीणां प्रयोगः कर्तुं शक्यते ।
- शीर्षकाणि आकर्षकाणि एव भवेयुः ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।